Roll No. ..................................
Signature of Invigilator ………………………

**Paper Code**
**BD-103**

# पतंजलिविश्वविद्यालयः

# University of Patanjali

**Examination December – 2018**

**B. A. Philosophy (Semester: First)**

**संस्कृत**

**संस्कृत-व्याकरणम् (तृतीयम्)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. पथिन्, राजन्, करिन्, विद्वस् आत्मन इत्येतेषां शब्दानां रूपाणि लिखन्तु।
2. पच्, नम्, गम् इत्येतेषां धातूना रूपाणि पञ्चसु लकारेषु (लटि, लोटि, लङि, विधिलिङि लृटि) लिखन्तु।
3. अचोऽन्त्यादि टि, अलोऽन्त्यात् पूर्व उपधा, सुप्तिङन्तं पदम्, संयोगे गुरुः, हलोऽनन्तराः संयोगः इत्येतेषां सूत्राणां 'अर्थोदाहरणानि सविस्तारं लिखन्तु'।
4. वृद्धिरेचि, आद्गुणः, अकः सवर्णे दीर्घः, एचोऽयवायावः, स्तोः श्चुना श्चुः इत्येतेषां सूत्राणां 'अर्थोदाहरणानि सविस्तरं लिखन्तु'।
5. कण्ठ्यतालव्यमूर्धन्यदन्त्यौष्ठ्याः वर्णाः के सन्ति? ससूत्रं सविस्तरं लिखन्तु।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. पाठकानां गुणाः उच्चारणदोषाश्च सश्लोकाः लिख्यन्ताम्।
2. 69, 49, 82, 26, 32, 16, 54, 73, 98, 79
   इत्येतेषामङ्कानां संस्कृतानुवादं कुर्वन्तु।
3. सन्धिं कृत्वा सन्धिसूत्रं लिखन्तु -

| | | | |
|---|---|---|---|
| (1) धातृ + अंशः | (2) सप्त + ऋषिः | (3) सो + अपि | (4) द्वौ + इमौ |
| (5) न + इति | (6) ग्रामम् + गच्छ | (7) लभ् + ध | |
| (8) रामः + अवदत् | (9) नृपाः + आगच्छन्ति | (5) उष् + त्र | |

4. गुरु, लघु, घ, घु 'पद' इति संज्ञासूत्राणि सार्थं लिखन्तु।
5. प्रयत्नः कतिविधः? वर्णानाम् 'आभ्यन्तरप्रयत्नं' स्पष्टयन्तु ससूत्रम्।
6. (क) हरि, गुरु, रमा, कर्तृ, गो - इत्येतेषां शब्दानां पञ्चमीविभक्ती लिखन्तु।
   (ख) दृश्, सद्, पा, स्मृ, पठ् - इत्येतेषां धातूनां लोट्लकारस्य मध्यमपुरुषस्य रूपाणि लिखन्तु।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

**1.** 44 इत्येतस्याः संख्यायाः संस्कृतानुवादोऽस्ति ....................
(अ) चतुः पञ्चाशत् (ब) चतुश्चत्वारिंशत्
(स) चतुस्चत्वारिंशत् (द) चतुष्चत्वारिंशत्

**2.** 'एकोनषष्टिः' इत्यस्यानुवादोऽस्ति ...................
(अ) 59 (ब) 29
(स) 69 (द) 79

**3.** स्पर्शवर्णाः कति सन्ति ?
(अ) 4 (ब) 25
(स) 16 (द) 8

**4.** अकारस्य 'आभ्यन्तरप्रयत्नं' किमस्ति ?
(अ) विवृत (ब) संवृत
(स) ईषद्विवृत (द) स्पृष्ट

**5.** पुत्रः + चलति .......................................
(अ) पुत्रो चलति (ब) पुत्रस्चलति
(स) पुत्रश्चलति (द) पुत्रः चलति

**6.** 'ह' इति वर्णोऽस्ति ................................
(अ) तालव्यः (ब) दन्त्यः
(स) मूर्धन्यः (द) कण्ठ्यः

**7.** गुरुसंज्ञाविधायकं सूत्रमस्ति ...................
(अ) गुरोश्च हलः (ब) दीर्घं च
(स) तरप्तमपौ घः (द) ह्रस्वं लघुः

**8.** ऊकालोऽह्रस्वदीर्घप्लुतः इति सूत्रं संज्ञा न करोति...................
(अ) ह्रस्वस्य (ब) गरोः
(स) दीर्घस्य (द) प्लुतस्य

**9.** 'इको यणचि' इत्यस्योदाहरणं नास्ति ...............................
(अ) रामोत्सवः (ब) पतत्यत्र
(स) दध्युपकारकः (द) भान्वत्र

**10.** 'झश्' इत्यस्मिन् प्रत्याहारे वर्णाः सन्ति .......................
(अ) 15 (ब) 10
(स) 8 (द) 9

--------------x--------------